## शतुरनुमो नद्यजादी । (१७३/३७१९)

अन्तोदात्तात् इति वर्तते । अनुम् यः शतृप्रत्ययस्तदन्तात् अन्तोदात्तात् परा नदी अजादिर्विभक्तिरसर्वनाम-[1]स्थानमुदात्ता भवति । तुदती । नुदती । [2]लुनती । पुनती । तुदता । नुदता । लुनता । पुनता । अनुमः । इति किम् ? तुदन्ती । नुदन्ती । अत्राप्युपदेशात् इति लसार्वधातुकादनुदात्तत्वे[3] (६. १. १८६/३७३०) एकादेशः, तस्य 'एकादेश उदात्तेनोदात्तः' (८. २. ५/३६५८) इत्युदात्तत्वम्, तस्य पूर्वत्रासिद्धत्वम् (८. २. १/१२) नेष्यते इति शत्रन्तमन्तोदात्तं भवति । नद्यजादी इति किम् ? तुदद्भ्याम् । नुदद्भ्याम् । तुदद्भिः । अन्तोदात्तात् इत्येव, ददती । दधतः । 'अभ्यस्तानामादिः' (६. १. १८९/३६७३) इत्याद्युदात्तावेतौ ।

[६९९] बृहन्महतोरुपसङ्ख्यानम् । (म. भा. ३. १०८)

बृहती । महती । बृहता । महता ॥

## उदात्तयणो हल्पूर्वात् । (१७४/३७२०)

[4]उदात्तस्थाने यो यण् हल्पूर्वस्तस्मात् परा नदी अजादिर्या असर्वनामविभक्तिरुदात्ता भवति । कर्त्री । हर्त्री । प्रलवित्री । प्रसवित्री । कर्त्रा । हर्त्रा । प्रलवित्रा । प्रसवित्रा । तृजन्ता एतेऽन्तोदात्ताः । उदात्तग्रहणं किम् ? [5]कर्त्री । हर्त्री । [6]कर्त्रा । हर्त्रा । तृन्नन्तोऽयमाद्युदात्तः । हल्पूर्वात् इति किम् ? बहुतितवा ब्राह्मण्या ।

[७००] नकारग्रहणं कर्तव्यम् । (म. भा. ३. १०८)

वाक्पत्नी इयं कन्या ॥

## नोङ्धात्वोः । (१७५/३७२१)

ऊङो धातोश्च य उदात्तयण् हल्पूर्वः, तस्मात् परा तृतीयादिर्विभक्तिर्नोदात्ता भवति । ब्रह्मबन्ध्वा । ब्रह्मबन्ध्वे । वीरबन्ध्वा । वीरबन्ध्वे । ऊङः प्रत्ययस्वरेण उदात्तः । तेन सह य एकादेशः सोऽप्युदात्तः इति उदात्तयण्वकारः, तस्मादुदात्तत्वे प्रतिषिद्धे 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (८. २. ४/३६५७) इति विभक्तिः स्वर्यते । धातुयणः खल्वपि—सकृल्ल्वा । [7]सकृल्ल्वे । खलप्वे । क्विबन्तस्य कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तस्य 'ओः सुपि' (६. ४. ८३/२८१) यणादेशः[8] ॥

## ह्रस्वनुड्भ्यां मतुप् । (१७६/३७२२)

अन्तोदात्तात् इत्येव । ह्रस्वान्तादन्तोदात्तान्नुटश्च परो मतुब् उदात्तो भवति । अग्निमान् । वायुमान् । [9]कर्तृमान् । हर्तृमान् । नुटः खल्वपि—अक्षण्वता । शीर्षण्वता । अन्तोदात्तात् इत्येव, वसुमान् (तै. सं. १. ६. ६.२) । वसुशब्द आद्युदात्तः, तस्मान् मतुब् अनुदात्त एव भवति । अत्र च 'स्वरविधौ व्यञ्जनमविद्यमानवत्' (व्या. प. ३७) इत्येषा परिभाषा नाश्रीयते[10]नुड्ग्रहणात्, तेन मरुत्वान् इत्यत्र न भवति ।

---

1. °स्थाने ग. 2. लुनती नास्ति फ. 3. कृते इत्यधिकम् क. ड. फ. ह. 4. उदात्तस्य स्थाने ब. क. ड. फ. 5. कर्त्री हर्त्री नास्ति क. 6. कर्त्रा हर्त्रा नास्ति फ. 7. उदाहरणमिदं नास्ति फ. 8. भवति इत्यधिकम् क. 9. उदाहरणमिदं नास्ति फ. 10. इति इत्यधिकम् फ.